इन्द्रियप्रीणनद्रव्यैर्विहितस्वात्मपूजनः ॥ ७ ॥

भूयो भूयः परे भावे भावना भाव्यते हि या) ।
(१)जपतोऽन्तः स्वयं नादो मन्त्रात्मा जप ईदृशः(२)॥(३)इति।
तादृशमेव ध्यानमपि(४) कुर्यादित्याह—अन्तर्मुखः इति ।
तत्र प्रत्ययैकतानता ध्यानमिति (५)योगपातञ्जलोक्तरीत्या विजातीयप्रत्ययानन्तरितसजातीयप्रत्ययप्रवाहलक्षणध्यानेन सदान्तः शब्द सूचितेनान्तर्मुखः परमशिवाद्वैतभावनापरो भूयादित्यर्थः। तदुक्तं विज्ञानभैरव(६)भट्टारकैः—

ध्यानं या निष्कला चिन्ता निराकारा(७) निराश्रया ।
न तु ध्यानं शरीरस्य मुखहस्तादिकल्पना ॥ इति ।
चित्कल्लोलास(८)दलितसङ्कोचस्त्वतिसुन्दरः ॥ (९) इति ।
चिदम्बुधिमहाभङ्गभिन्नसङ्कोच(१०)सुन्दरः ।

इत्यस्म(११)द्गुरूक्तरीत्या परिकल्पितपरिपूर्णाहंभावः । अत

(१) 'जयत्यन्तस्स्वयं' क०
(२) 'ईरितः' ख०
[३] 'इति' नास्ति क०
(४) 'तादृशमपि ध्यानं' ख०
(५) 'योगशास्त्रोक्त' ख०
(६) 'भैरव' इति नास्ति ख०
(७) 'निर्विकारा' इत्ययमपि पाठः ख०
(८) 'चित्कल्लोलाभिदलित' क०
[९] 'इति' नास्ति क०
[१०] 'सङ्कटः' ख०
[११] 'स्मदुक्त' ख०

पाशाङ्कुशवराभीतिहस्तान् शक्तिसमन्वितान्॥ इति(१)।
एतांस्तु विन्यसेद्देहे(२)मातृकान्यास(३)वत्प्रिये॥२०॥इति।
स्वरैस्तु सहितः सूर्यं हृदयाधः प्रविन्यसेत् ॥
बिन्दुस्थाने सुधासूर्तिं यादिवर्णचतुष्टयैः ॥ २१ ॥
भूपुत्रं लोचनद्वन्द्वे कवर्गाधिपतिं प्रिये ॥
हृदये विन्यसेच्छुक्रं चवर्गाधिपतिं पुनः(४) ॥ २२ ॥
हृदयोपरि विन्यस्येट्टवर्गाधिपतिं बुधम् ॥
बृहस्पतिं कण्ठदेशे तवर्गाधिपतिं प्रिये ॥ २३ ॥

न्याह—एतान् गणेशान्(५)। मातृकावैकरी(६) स्थानेषु न्यसेदित्यर्थः ॥१३—२०॥

ग्रहन्यासमाह—स्वरैरिति ।

स्वरैरकारादिविसर्गान्तैः षोडशभिः सहितमादौ (नाम्ना) सूर्यं हृदयाधो विन्यसेत्(७) बिन्दुस्थाने ललाटे । अत्रैवोक्तम् ।

दीपाकारोऽर्द्धमात्रश्च ललाटे वृत्तमिष्य(८)ते ।

इत्यादिना ।

(१) 'इति' नास्ति क ।
(२) 'देवि' ख ।
(३) 'कास्थान' ख ।
(४) 'बुधः' ख ।
(५) 'मातृकान्यासवत्' इत्यधिकः पाठः ख ।
(६) 'न्यासस्थानेषु ख ।
(७) 'विन्यस्य' ख ।
(८) 'वृत्त इष्यते' क ।

नाभौ शनैश्चरं देवि [१]पवर्गेशं सुरेश्वरि ॥
वक्त्रेशादिचतुर्वर्णैः सहितं राहुमत्र च ॥ २४ ॥
क्षकारसहितं केतुं पायौ देवेशि विन्यसेत् ॥ (२)इति ।
ललाटे दक्षनेत्रे च वामे कर्णद्वये पुनः ॥ २५ ॥
पुटयोर्नासिकायाश्च कण्ठे स्कन्धद्वये पुनः ॥
पश्चात्कूर्पर(३)युग्मे च मणिबन्धद्वये पुनः(४)॥२६॥
स्तनयोर्नाभिदेशे च कटिबन्धे ततः परम्(५) ।
ऊरुयुग्मे तथाजान्वोर्जङ्घयोश्च पदद्वये ॥ २७ ॥
[आद्ययुग्मन्तथा चैकं ततस्त्रीणि चतुष्टयम् ॥

सुधामूर्तिं चन्द्रमसं यादिवर्णचतुष्टयैः ।
यरलवैश्चतुर्भि(६)र्विन्यसेदित्यन्वयः । (७)भूपुत्र मङ्गारकं लोचनद्वन्द्वे कवर्गस्योपरिस्थितमधिपतिं विन्यसेत् । हृदये वक्षसि । स्पष्टमन्यत् । पायौ देवेशि विन्यसेदित्यन्तम्(८) ।

---

(१) 'चैव' ख ।

(२) इत्यनन्तरं "रक्तं श्वेतं तथा रक्तं नीलं श्वेतं च पाण्डुरम् । कृष्णधूम्रं तथा धूम्रं भावयेद् रविपूर्वकम् ॥ कामरूपधराः सर्वे विचित्राम्बरभूषिताः ।" इत्यधिकः पाठः ख ।

(३) 'कूर्परयोर्युग्मे' क ।

(४) 'तथा'-ख ।

(५) 'पुनः' क ।

(६) 'चतुर्भिः' नास्ति ख ।

(७) 'इत्यर्थः' ख ।

(८) 'कवर्गाधिपतिं' क ।

अमृतादियुताः सम्यङ् न्यस्तव्याश्च (१) सुरेश्वरि! ॥
पादे लिङ्गे च कुक्षौ च हृदये बाहुमूलयोः(२) ॥३४॥

ठङ्कारी द्वादश ह्येता द्वादशारे समर्चयेत् ।
डाकिनीं (३)चैव ढङ्कारीं णामिनीं (४)तामसीं तथा ॥
स्थाण्वीं दाक्षायणीं चैव धात्रीं नन्दाश्च पार्वति ! (५) ।
फट्कारीं(६)दशपत्रेषु पूर्वादीशान्तिकं यजेत्(७) ॥
बन्धिनीं भद्रकालीं च महामायां यशस्विनीम् ।
रक्तां लम्बोष्ठिकां चैव पूजयेत्क्रमशः प्रिये(८) ॥
चतुष्पत्रे च(९) देवेशि ! वरदां च श्रियं तथा ।
षण्ढां सरस्वतीं चैव पूजयेत्क्रमशः शिवे ! ॥
क्षमां हासवतीं चैव पूजयेच्च द्विपत्रयोः(१०) ।
एताभिः शक्तिभिर्युक्ता(११) ध्यातव्याश्च सुरेश्वरि !॥

(१) 'सम्यग् ध्यातव्याश्च' ख ।
(२) 'मस्तके' ख ।
(३) 'डामर्वीं' ख ।
(४) 'णामनीं' ख ।
(५) 'थान्ता दाक्षायणी धात्री ज्ञेया नाद्या च पार्वती' ख ।
(६) 'फङ्कारीं' ख ।
(७) 'इति' इत्यधिकः पाठः ख ।
(८) 'शिवे' इति ख ।
(९) 'चतुष्पत्रेषु' ख ।
(१०) 'द्विपत्रके' ख ।
(११) 'शक्तियुक्ताभिः' ख ।

कुलान्तं(१) देविकोटं(२)च गोकर्णं मारुतेश्वरम् ॥३९॥
अट्टहासं च विरजं राजगेहं(३) महापथम् ॥
कोलापुर(४)मेलापुरं ओङ्कारन्तु(५) जयन्तिका ॥४०॥
उज्जयिन्यपि चित्ता(६) च क्षीरकं हस्तिनापुरम् ॥
ओड्डीशं(७) च प्रयागाख्यं षष्ठं मायापुरं तथा॥४१॥
जलेशं मलयं शैलं मेरुं गिरिवरं तथा ॥
महेन्द्रं वामनं चैव हिरण्यपुरमेव च ॥ ४२ ॥

मातृकास्थानमिति जातावेकवचनम्(८)। वैखरीवर्णस्थानके(९)ष्वि-त्यर्थः। ननु कानि तानि पीठानीत्यत आह— बहुत्वात्पीठानां नाम्नां(१०) वक्तुमशक्यत्वादसन्त(११)सावधाना भवेत्यर्थः। तत्रा-मान्याह—एते पीठाः समुद्दिष्टा गृहीतनामानः पीठा(१२)। मातृकारू-

(१) 'कुलूतं' क।
(२) 'कोट्यं' ख।
(३) 'राजगृहं' ख।
(४) 'कोल्लगिरि' ख।
(५) 'कालेशं च' ख।
(६) 'उज्जयनी विचित्रं च' ख।
(७) 'उड्डीशं' ख।
(८) 'एकत्वम्' ख।
(९) 'स्थानेषु' ख।
(१०) 'पीठनाम्नां' ख।
(११) 'अत्यन्त' इति नास्ति ख।
(१२) 'एते००० पीठाः' इत्यंशो नास्ति ख।

महालक्ष्मीपुरोड्याणं(१) छायाछत्रमतः परम ॥
एते पीठाः समुद्दिष्टा मातृकारूपकाः स्थिताः ॥ ४३ ॥
एवं षोढा पुरः(२) कृत्वा श्रीचक्रन्यासमाचरेत् ॥
श्रीमत्त्रिपुरसुन्दर्याश्चक्रन्यासं शृणु प्रिये ! ॥४४॥

पकाः स्थिता(३) मातृका रूपं ये(४)षां ते मातृकारूपकाः । क्रमेणादिक्षान्तानामेकैकं वर्णमेकैकस्यादावुक्ता तत्स्थानं त(५)-द्वर्णस्थानेषु पीठन्यासं कुर्यादित्यर्थः । [ पी(६)ठानां मातृकामयताकथनं गणेशादीनामप्युपलक्षणम् । वर्गवर्णानामादौ वैखर्याक्षराण्यागमान्तरसंवादाद्विभज्य योज्यानीत्यर्थः]॥३६-४३॥

षोढान्यासानन्तरं श्रीचक्रन्यासस्याऽवश्यंभावित्वात्तदिदानीं श्रीचक्रन्यास(७)माह—एवमिति ।

एवमुक्तप्रकारेण । षोढा षट्प्रकारन्यासं पु(८)रः कृत्वा पश्चा(९)च्छ्रीचक्रन्यासमार(१०)भेदित्यर्थः ।

(१) 'ड्याणो' ख ।
(२) 'पुरा' इति ख० पु० पा० ।
(३) 'पीठाः' इत्यधिकः पाठः ख० ।
(४) 'एषां' ख० ।
(५) 'तत्तत्स्थानेषु' इति ख० ।
(६) []इतिचिन्हान्तर्गतो ग्रन्थो नास्ति ख० ।
(७) 'अवश्यम्भावित्वात् श्रीचक्रन्यासस्य' इति ख० पु० पा० ।
(८) 'पुरा' ख० ।
(९) 'पश्चात्' इति ख० पु० नास्ति ।
(१०) 'चरेत्' इति ख० पु० पा० ।

यन्न कस्यचिदाख्यातं तनुशुद्धिकरं परम् ॥
चतुरस्राधरेखायै नम इत्यादितो न्यसेत् ॥ ४५ ॥

श्रीचक्रन्यासस्य महाप्रयोजनत्वादनन्यकथितमपि अथ प्रियायै कथयामीत्याह—श्रीमदिति ।

आनन्दक(१)णाभिक्षार्थं शब्दस्पर्शादिप(२)कणे ।
अ(३)त्यविरतं येन तदारिद्र्यं विदुर्बुधाः ॥

इत्यभियुक्तवचनोक्तरीत्या सङ्कोचलक्षणदारिद्र्यवि(४)घातिनी परिपूर्णपरानन्दरूपा सम्पत् श्रीरित्युच्यते । तद्वती त्रिपुरसुन्दरी । त्रिपुर(५)तुरीयरूपत्वात् सुन्दरी । भेदलक्षणप्रपञ्चापरपर्यायपर(६) दौर्भाग्यपरिपन्थिपरमाद्वैतसौभाग्यपदाधिरूढा सर्वप्राणिष्वा(७)त्मतया परम(८)प्रेमास्पदीभूता परचित्कला । तस्याः चक्रं शिवादिक्षितिपर्यन्तं(९) तत्त्वमयं तदाविर्भावभूमिः । न्यासं शृणु प्रिये मम प्रियायै मदेकरसस्य लालसायै कथयामि । तस्य यन्न कस्यचिदाख्यातमि(१०)ति रहस्यत्वात् । [श्रीचक्र(११)

(१) 'कन्द' इति ख० पु० पा० ।
(२) 'कारणे' इति ख० पु० पा० ।
(३) 'उपेत्य' इति ख० पु० पा० ।
(४) 'निवर्त्तिनी' इति ख० पु० पा० ।
(५) 'त्रिरूपभेद' इति क० पु० पा० ।
(६) 'परम' इति ख० पु० पा० ।
(७) 'स्वा' इति क० पु० पा० ।
(८) 'म' ख० पु० नास्ति ।
(९) 'तत्त्वचक्रमयं तदविनाभा०' इति ख० पु० ।
(१०) 'म' इति ख० पु० पा० ।
(११) []एतदन्तर्गतो ग्रन्थः ख० पु० नास्ति ।

शिष्टे द्वे द्वादशान्ते च पादाङ्गुष्ठे च विन्यसेत् ॥
तदन्तः षोडशदलपद्माय नम इत्य(१)पि ॥ ५२ ॥

नानापन्तर्देशेष्वष्टसु विन्यसेत्(२) । शिष्टे द्वे मुद्रे(३) द्वादशान्ते (४)पादाङ्गुष्ठे च विन्यसेत् । द्वादशान्तं षोडशान्तेन्दुमण्डलादधः सूर्यमण्डलस्थानम् । तदुक्तं श्रीस्वच्छन्दसङ्ग्रहे—

षोडशान्तमिति ख्यातं व्योमस्थानेन्दुमण्डलम् ।
तद(५)धःस्थानगं सूर्यबिम्बं द्वादशशक्तिकम् ॥
द्वादशान्त(६)मिति ख्यातं स्थितं व्योमप्रदेशकम् ।
इति(७) तेन बिन्दुतत्त्वं चतुष्पत्राम्बुजश्च तत्(८) ॥
सूर्यबिम्ब(९)मधश्चोर्ध्वं सार्धैकाङ्गुलिदेशतः ।

इति (१०)रीत्या ललाटस्थानबिन्दुतत्त्वोपरिस्थितं सूर्यमण्डलस्थानं ललाटोर्ध्वं द्वादशान्तपदेन लक्ष्यते ।

षोडशदलपद्मव्यापकमाह—तदन्तरिति ।

---

(१) 'इत्यथ' ख०
(२) 'विन्यस्य' ख० ।
(३) 'मुद्रे' नास्ति ख० ।
(४) 'द्वादशान्तपादाङ्गुष्ठयोर्वि०' ख० ।
(५) 'तथान्त;' 'तदन्त' ख० ।
(६) 'द्वादशान्तं स्मृतं तेन' ख० ।
(७) 'इति' नास्ति क० ।
(८) 'चतुष्पत्राम्बुजमेतदित्यादि' क० ।
(९) 'सूर्य बिन्दुमधश्चोर्ध्वं' ख० ।
(१०) 'स्वच्छन्दसङ्ग्रहोक्त०' इत्यधिकं क० पुस्तके ।

सर्वसङ्क्षोभिण्या(१)द्यास्तु तस्य कोणानि वच्म्यहम् ॥
ललाटं दक्षभागं च दक्षगण्डांसमध्यतः ॥ ५८ ॥
पार्श्वान्त(२)रूरुजङ्घान्तर्वामजङ्घादि पार्वति! ॥
वामोर्वन्तं वामपार्श्वं वामांसं वामगण्डकम् ॥ ५९ ॥

चतुर्दशकोणे न्यस्तव्याः शक्तीराह—सर्वसङ्क्षोभिण्याद्या इति।

सर्वसङ्क्षोभिण्याद्याः सर्वसङ्क्षोभिणीसर्वविद्राविणीसर्वाकर्षिणीसर्वाल्हा(३)दिनीसर्वसम्मोहिनीसर्वस्तम्भिनीसर्व(४)जृम्भिणीसर्ववशङ्करीसर्वरञ्जनीसर्वोन्मादिनीसर्वार्थसाधिनीसर्वसम्पत्ति(५)पूरणीसर्वमन्त्रमयीसर्वद्वन्द्वक्षयङ्कर्यः। शिष्टं स्प(६)ष्टम्।

तत्कोणानि प्रतिज्ञापूर्वकमाह—तस्य कोणानीत्यादि।

दक्षभागं ललाटस्यैव ललाट इति प्रकृतत्वाद्दक्षगण्डदक्षांसमध्यत इत्यर्थः। पार्श्वान्त(७)रूरुजङ्घान्तरिति त्रिभिरपि दक्षशब्दो युज्यते। 'वामजङ्घादी' त्यादिशब्दः शिष्टार्थारम्भद्योतकः। वामांस इत्यत्राऽपि मध्ये इति योज्यम्। पृष्ठमिति शिरसः पृष्ठमि(८)ति ज्ञेयम्। दक्षवामयोः प्रथमं ललाटोपादानात्।

---

(१) 'सर्वसङ्क्षोभिकाद्यास्तु' ख०।
(२) 'दक्षपार्श्वोरुज०' ख०।
(३) 'सर्वाह्लादकारिणी' ख०।
(४) 'सर्वजृम्भिनी' ख०।
(५) 'सर्वसम्पत्तिरूपिणी' ख०।
(६) 'शिष्टं स्पष्टम्' नास्ति ख०।
(७) 'पार्श्वोरुज०' ख०।
(८) 'पृष्ठमेव' ख०।

ललाटवाममध्ये च तथा वै पृष्ठमित्यपि ॥
ततो द(१)शारचक्राय नम इत्यपि पार्वति! ॥ ६० ॥
तस्य कोणानि दक्षाक्षि ना(२)सामूलाऽऽस्यनेत्रके ॥
कुक्षीशवायुकोणेषु जानुद्वयगुदेषु च ॥ ६१ ॥
कुक्षिनैर्ऋतिब्रह्माख्यकोणेष्वेषु न्यसेत्पुनः ॥

---

ललाटं शिरसः पुरस्ताद्भागः ।

बहिर्दशारचक्रव्यापकमाह—तत इति ।

ततश्चतुर्दशारकोणन्या(३)सानन्तरम् । "दशारचक्राय नमः" इति मन्त्रेण दक्षाक्ष्यादिदशकोणानि संस्पृश्य व्यापकमपि शब्दान्न्य(४)सेदिति योज्यम् ॥५८-६०॥

दशारचक्रस्य कोणान्याह—तस्येति ।

तस्य दशारचक्रकोणानि दशा(५)पि दशसु दक्षाक्ष्यादिस्थानेषु भावनीयानीति (६)शेषः । कुक्षीशवायुकोणेषु छान्दसत्वात् द्वित्वे बहुवचनम् । बाहु(७)द्वयमारभ्योरुद्वयपर्यन्तं कुक्षिशब्देन लक्ष्यते, तेन कुक्षेरुपरिभागः प्राची, अधोभागः प्रतीची, दक्षिणवामपार्श्वे दक्षिणोदीच्यौ । कोणशब्देन

---

(१) 'बहिर्दशा०' इति ख० पुस्तके पाठान्तरम् ।
(२) 'नासिकामूलनेत्रके' ख० ।
(३) 'कोणान्तरे' ख० ।
(४) 'शब्दाद्विन्यसेदिति' ख० ।
(५) 'दशापि' नास्ति ख० ।
(६) 'भावनीयानीत्यर्थः' ख० ।
(७) 'जत्रुद्वन्द्वमारभ्योरुमूलपर्यन्तं' क० ।

ज्ञेयं पार्श्वचतुष्कं च मणिपूरादि वामकम् ॥
चतुष्टयं च पार्श्वानामेत(१)त्कोणाष्टकं(२)मतम्॥६७॥
हृदयस्थत्रिकोणस्य चतुर्दिक्षु बहिर्न्यसेत् ॥
शरचापौ पाशसृणी त्रिकोणाय नमस्तथा ॥ ६८ ॥

तस्याष्टारचक्रस्य। कोणेषु वशिन्याद्यष्टकं वशिनीकामेश्वरीमोदिनीविमलाऽरुणाजयिनीसर्वेश्वरीकौलिन्यः।

तस्य कोणाष्टकमाह—चिबुकमित्यादि।

चिबुकादीनां पार्श्वचतुष्कं दक्षिणं मणिपुरादि। मणिपूरकं (३)नाभिस्थानम्। नाभिहृदयकण्ठाचि(४)बुकानां (५)वामपार्श्वचतुष्कं चैतत्कोणाष्टकम् ॥ ६४–६७ ॥

अनन्तरमायुधावरणन्यासमाह—हृदयस्थेति।

[(६)हृदये वक्षसि तिष्ठतीति हृदयस्थं स्तनद्वयमध्यनिम्नत्रिकोणाकारहृदयस्थत्रिकोणमित्युच्यते तस्य। बहिश्चतुर्दिक्षु मार्गादिषु।] कामेश्वरीकामेश्वरयोः शरचापौ पाशसृणी (७)चेत्यायुधचतुष्टयं (८)न्यसेत्। अत्रैव वक्ष्यति—

(१) 'मेतदेवाष्टकं' इति क०।
(२) 'पुनः' ख०।
(३) 'नाभिस्थानम्' नास्ति क०।
(४) 'चुबुकानां' क०।
(५) 'वामकं पार्श्वं' इति क० पु०।
(६) [ ] एतदन्तर्गतो ग्रन्थः ख० पु० नास्ति।
(७) 'चेत्यायुधाष्टकं' क०।
(८) 'मिलितं न्यसेत्' ख०।

विन्य(१)स्य तस्य कोणेषु अग्रदक्षोत्तरेषु च ॥
कामेश्वर्यादिदेवीनां(२)मध्ये देवीं च विन्यसेत् ॥६९॥

बाणाग्रे भुवोश्चापौ कर्णे पाशद्वयं न्यसेत्(३) ।
[सृणिद्वयं(४)च नासाग्रं दक्षिणाग्रं तु विन्यसेत् ॥]
(यो० हृ० सं० १–७१)

ततस्त्रिकोण(५)चक्रव्यापकमाह–त्रिकोणायेति ।
"त्रिकोणाय नमः"इति मन्त्रेण रेखात्रयं संस्पृश्य व्यापकं विन्यस्य ।

त्रिकोणे (६)न्यस्तव्या देवीराह–तस्येति ।

तस्य त्रिकोणस्य । अग्रदक्षोत्तरेषु कामेश्वरीवज्रेश्वरीभगमालिन्यः । (७)तासां कामेश्वर्यादिदेवीनाम् । मध्ये देवीं च विन्यसेत् इति । मध्ये बैन्दवे (८)श्रीचक्रे । देवीं प्रकाशविमर्शसामरस्यरूपां त्रिपुरसुन्दरीं (९)च विन्यसेदित्यर्थः ॥६८–६९॥

(१) 'विन्यसेत्' इति क० ।

(२) 'देवीश्च' इति ख० पु० ।

(३)'हृदयस्थत्रिकोणस्येति । हृदयमध्यस्थानं निम्नत्रिकोणकारं हृदयस्थत्रिकोणमुच्यते । तस्य चतुर्दिक्षु शरादिन्यसेत्' इति ख० पु० अधिकम् । वस्तुतस्तु कपुस्तकस्थः [ ] एतच्चिह्नान्तर्गतग्रन्थस्थानस्थोऽयं प्रबन्धो लेखकप्रमादादत्र पतितः स्यादिति मन्ये ।

(४) [ ] एतदन्तर्गतो ग्रन्थः ख० पु० नास्ति ।

(५) 'चक्र' इति नास्ति ख० ।

(६) 'त्रिकोणेन्यस्तव्या' ख० ।

(७) 'भगमालिनी एतासां' इति ख० पु० ।

(८) 'बैन्दवश्रीचक्रे' इति ख० पु० ।

(९) 'च' नास्ति ख० ।

एवं मयोदितो देवि ! न्यासो (१)गुह्यतमक्रमः ॥
एतद् गुह्यतमं(२)कार्यं त्वया वै वीरवन्दिते ! ॥७०॥
समयस्थाय दातव्यं नाऽशिष्याय कदाचन ॥

श्रीचक्रन्यासमुपसंहरति–एवमिति ।
इति स्पष्टम् ॥

अतस्त्वयाऽप्येतन्न्यासजातं (३)गोप्यमित्याह-एतदिति ।
इति स्पष्टम् ॥ ७० ॥

ननु किमेतत्त कस्मैचिदपि कथनीयमित्यत आह–समयस्थायेति ।

समयस्थाय (४)कौलिकाय समयाचारनिष्ठाय देयम् । पशुसमया(५)चारनिष्ठाय न देयमित्यर्थः ।

(६)ननु कौलिकसमयस्थायाऽपि (७)सर्वस्मै देयं नेत्याह–नाऽशिष्यायेति ।

समयस्थायापि अशिष्याय [(८)अन्यशिष्याय] न देयम् ॥

मयाप्येतत्त्व(९)दन्यस्य कस्यापि न (१०)प्रकटीकृतमित्या-

(१) 'गुह्यतमः स्मृतः' क० पु० ।
(२) 'गुह्यतरं' इति ख० ।
(३) 'गोप्यं कार्यमि०' क० पु० ।
(४) 'कौलिकसमयाचार०' इति ख० ।
(५) 'पशुसमयाचारपराय' इति ख० ।
(६) 'ननु' नास्ति क० ।
(७) 'समयस्थाय सर्वस्मै' इति ख० ।
(८) []एतदन्तर्गतं नास्ति ख० ।
(९) 'त्वदन्यतोऽपि न कस्यापि' इति ख० ।
(१०) 'पुरा प्रकटी' इति ख० ।

गुप्ताद् गुप्ततरञ्चैतत्तवाऽद्य प्रकटीकृतम् ॥ ७१ ॥
मूलदेव्यादिकं न्यासमणिमान्तं पुनर्न्यसेत् ॥

---

ह—गुप्तादिति ।

गुप्तादपि (१)गुप्ततरम् । रहस्याद(२)प्यत्यन्तरहस्यत्वात् । एतच्च मदंशभूतविमर्शात्मिकायाः (३)प्रियतमायाः प्रियतमेन मयाऽद्य प्रकटीकृतम् । पुराऽन्यस्मै न प्रकटीकृतमिति तात्पर्यम् ॥ ७१ ॥

अस्यैव न्यासस्य पुनः प्रकारान्तरमाह—मूलदेव्यादिकमिति ।

पूर्वमणिमादिमूलदेव्य(४)न्तश्रीचक्रावरणदेवतान्या(५)समुक्त्वा इदानीं मूलदेव्याद्यणिमान्तं पुनः श्रीचक्रावरणदेवतान्यासं कुर्यादित्यर्थः ।

मूल(६)देव्यादिन्यासप्रकारमेवाह—शिरस्त्रिकोणेति ।

मूलदेव्यादिकमित्यनेनैव शिरस्त्रिकोणमध्ये मूलदेव्याः प्रथमन्यासो ज्ञेयः । पश्चाच्छिरस्त्रिकोण(७)मध्ये निम्नं त्रिकोण(८)मस्ति, त(९)द्वा मृदुतरं दृश्यते । तत्र पूर्वा(१०)दिशब्दाद्दक्षि-

---

(१) 'गुप्ताद् गुप्ततरं' इति ख० ।
(२) 'रहस्याद्प्यतिरह०' ख० ।
(३) 'प्रियतमाया अपि यतो मया' ख० ।
(४) 'मूलदेव्यन्तं' ख० ।
(५) 'न्यासमुक्तम्' क० ।
(६) 'मूलदेवतादि' ख० ।
(७) 'शिरस्त्रिकोणे शिरःकपालमध्ये' ।
(८) 'त्रिकोणाकारमस्ति' ख० ।
(९) 'तद्वाल्ये' ख० ।
(१०) 'पूर्वादि आदिशब्दा०' इति ख० ।

शिरस्त्रिकोण(१)पूर्वादि कामेश्वर्यादिकं न्यसेत् ॥७२॥
बाणान्नेत्रे भ्रुवोश्चापौ कर्णे पाशद्वयं (२)न्यसेत् ॥
सृणिद्वयं(३) च नासाग्रे दक्षिणाग्रं तु विन्यसेत् ॥७३॥

णोत्तरकोणयो(४)र्ग्रहः । का(५)मेश्वर्यादिशब्देन(६) वज्रेश्वरीभगमालिन्यौ गृह्येते । शिरस्त्रिकोणाग्रदक्षवामकोणेषु कामेश्वरीवज्रेश्वरीभगमालिनीर्विन्यसेत् इत्यर्थः ॥ ७२ ॥

आयुधावरणन्यासमाह—बाणानित्यादि ।

बाणान् का(७)मेश्वरकामेश्वर्योः। ने(८)त्रे नेत्रयोः । चापौ भ्रुवोः। पाशद्वयं कर्णे(९) कर्णयोः। सृ(१०)णिद्वयन्तु नासाग्रोभयपार्श्वयोः। नेत्र(११)कर्णे नासाग्रे इति चैकवचनप्रयोगो द्विवचनोपलक्षणम्। दक्षि(१२)णाग्रमिति च कथनात्। एषु स्थानेषु दक्षिणे कामेश्वरस्य वामे कामेश्वर्याश्चायुधानि विन्यसेदित्यर्थः ॥७३॥

---

(१) 'त्रिकोणे' ख० ।
(२) 'पुनः' ख० ।
(३) 'तु' ख० ।
(४) 'कोणयोर्ग्रहणम्' ख० ।
(५) 'कामेश्वर्यादिका आदि' ख० ।
(६) 'शब्दाद्वज्रेश्वरी' ख० ।
(७) 'कामेश्वरीकामेश्वरयोः' ख० ।
(८) 'नेत्रे' इति ख० नास्ति ।
(९) 'कर्णे' नास्ति ख० ।
(१०) 'सृणिद्वयं नासोभयपार्श्वयोः' ख० ।
(११) 'नेत्रे कर्णे' इति ख० ।
(१२) 'भ्रुवोर्दक्षिणाग्र०' ख० ।

मुण्ड(१)मूलक्रमेणैव न्यसेद्वाग्देवताष्टकम् ॥
बैन्दवादीनि चक्राणि न्यस्तव्यानि वरानने ! ॥ ७४ ॥
नेत्रमूले त्वपाङ्गे च कर्णपूर्वोत्तरे पुनः ॥

वशिन्याद्यावरणन्यासमाह–मुण्डमिति ।

मुण्डं शिरः । त(२)स्य मूलक्रमेणाष्टदिक्षु परितो वा(३)ग्दे-वतानां वैखर्यष्टवर्गाधिष्ठात्रीणां वशिन्यादीनां दे(४)वतानामष्टकं न्यसेत् ।

ननु बैन्दवचक्रादुपर्यर्धचन्द्राद्युन्मन्यन्तानां सूक्ष्मावयवानां न्यासः किमिति नोक्त इ(५)त्यत आह–बैन्दवादीनीति ।

बैन्दवादीनि (६)चतुरस्रान्तानि नव चक्राणि न्यस्तव्या-नि स्थूलत्वात् । अर्धचन्द्राद्युन्मन्यन्तानि (७)भावनीयानीत्यर्थः । स्थूलन्यासप्रसङ्गे स्थूलानामेव न्यासो (८)निगद्यते इति भावः ॥ ७४ ॥

सर्वज्ञाद्यावरणन्यासमाह–नेत्रमूले इत्यादि ।

कर्णोत्तरं कर्णस्य पश्चाद्भागः । चूडादिके चूडायाः आदि-

---

(१) 'मुण्डमाला' ख० ।
(२) 'तस्य मालाक्रमेण' ख० ।
(३) 'वाग्देवताष्टकं वागधिष्ठात्रीणां वशिन्यादीनां' ख० ।
(४) 'देवतानां' नास्ति ख० ।
(५) 'इत्याह' ख० ।
(६) 'चक्राणि' नास्ति ख० ।
(७) 'विभावनीयानीति । अतः स्थूल०' ख० ।
(८) 'विधते' ख० ।

# योगिनीहृदयदीपिकायामुल्लिखितग्रन्थ-ग्रन्थकर्त्तृणां नामानि ।

नामानि— पृष्ठाङ्काः—


अभियुक्त ४, ६, १३, ५१, ५४, ६२, ९६, १०२, १०४, १०७, १०८, १५७, १६०, २११, २७९.

अस्मद्गुरु ६८, ७१, १३९, १५२, १५३, १५९, १६१, २१५, २२०, २३९, २९९, ३०२.

आगमान्तर १७१, २७८, २९१, २९५, २९६, २९९, ३००.

आज्ञावतार ९, ७३, २२१, २७३.

ईश्वरप्रत्यभिज्ञा ४१, ५६, ७०.

उत्तरपद २३०.

उड्डारोर्ध्वतन्त्र १४.

उपचारोपनिषत् २३२.

उपनिषत् ९२, ११५, १३३, २१०, २८७, ३०७.

कामकलाविलास ११, १५, ८५, ९?. १२७, २८०.

क्रमोदय २२५, २४०.

ग्रन्थान्तर १६४.

चतुःशती १३३, १४२, २३३, २३६, २४२, २४५, २४७, २५२, २५९, २६१, २६५, २६६, २६८, २७१, २७२, २७४, २७६, २८६, ३०५.

चिद्गगनचन्द्रिका ६, १०, ७३, १०३, ११४, १४३.

ज्ञानदीपविमर्शिनी १२७.

तत्त्वविमर्शिनी १९६.

तन्त्रान्तर ४२, ७१, ७३, १४४, २२२, २९२, ३०६, ३०८.

तन्त्रावलोक १५७.

नवशतीशास्त्र ४१.

निघण्टु ३००.

परापञ्चाशिका ५२, ६४, १०३, २४०, २४९, २५०, २५४, २६२, २६४,

२६७, २९०.
प्रामाणिकवचन ४१, ७०, १४४, १५१, २२४, २३१, २४६, २७८.
भगवद्गीता ५, ८३.
भूतलिप्यनुसार क्रम २५६.
महाकवि ६३, २०५, २६३.
महास्वच्छन्द ३
महास्वच्छन्दसङ्ग्रह १०४.
मुख्याम्नायरहस्यविधि १६२, २३१.
लघुस्तोत्र २८१.
विज्ञानभैरव भट्टारक ३१, १४७, १४८, १५२, १५६, १५८, १६०, १६१
१६२, २०३, २२२, २२४, २६१, २८३, २८४, २९
३०३, ३०७.
वेदरहस्य ७.
शैवतन्त्र २८८, २८९, २९०, २९१, २९२.
श्रीपराक्रम २०४, २१३.
श्रीपरात्रिंशिका ७१.
श्रुति ३, ९, ४१, ८३, ८४, ८५, ८९, ११४, १४१, १३४, १४५, १६
२४३, २६४.
सङ्केतपद्धति ९, १३, ३३, ६०, ६१, ६७, ८७, ८८, ११३, १३०, १३
१५५, २२६, २५८.
सुभगोदय ४५.
सौभाग्य सुभगोदय ३८, ७९, ९८, १३५.
स्तोत्रावली २५५.
स्वच्छन्द भैरव १२०.
स्वच्छन्दसङ्ग्रह १९, २१, २२, २३, २५, २६, २७, २८, २९, ३०
३१, ३६, ४२, ४५, ११०, १११, ११३, ११५, ११
१२१, १२४, १२६, १३०, १३२, १४२, १६९, १७
२०१, २१४, २१५, २१६, २१७, २१८, २१९, २४
२५१, २५५, २६४, २७२, २७८, २९१, २९
२९६, २९९, ३००.
हंसपरमेश्वर १२४.